# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा- शास्त्री-३ (SEM-5) | प्रश्नपत्र-८ | गुणाः - ७० |
| विषयः- वास्तुशास्त्रम् | CE3510 | समयः - ११ तः ०२ |
| दिनाङ्कः - ०२/१२/२०१६ | सन्दर्भग्रन्थः -वास्तुसौख्यम् | |

॥ प्रथमान्वितिः ॥

**प्र-१ द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** ०८

१. सम्पातावेशानामध्यानि समानि च पदानाम् ।
तानि मर्माणि विद्यान्न तानि परिपीडयेत् प्राज्ञः ॥

२. पूर्वादिदिग्विनिर्देश्या गृहद्वारविवक्षया ।
भास्करोदयदिक्पूर्वा न विज्ञेया यथार्थतः ॥

३. नवभागं गृहं कृत्वा पञ्चभागं तु दक्षिणे ।
त्रिभागं वामतः कृत्वा शेषे द्वारं प्रकल्पयेत् ॥

**प्र-२ एकस्योपरि निबन्धं लिखतु ।** ०८

१. दिग्द्वारफलानि ।

२. एकाशीतिपदवास्तुचक्रम् ।

**प्र-३ द्वयोरुपरि टिप्पण्यौ कार्या ।** ०४

१. दिक्षुनक्षत्राणि ।

२. दक्षिणद्वारफलम् ।

३. गृहद्वारस्य दिशा ।

४. देवतानां पदसंख्या ।

**प्र-४ पञ्चानामुत्तराणि लिखत ।** ०५

१. एकाशीतिवास्तुपदमण्डलस्य अपरं नाम किम् ?

२. इन्द्रस्य कति पदसंख्या भवति ?

३. चतुःशालगृहग्रामे कुत्र भवति ?

४. शूद्रस्य गृहस्य दिशा लिखतु ।

५. मुख्यद्वारं कुत्र करणीयम् ?

६. देवगृहे द्वारं कुत्र भवति ?

७. पूजनगृहे द्वारं कुत्र करणीयम् ?

॥ द्वितीयान्वितिः ॥

**प्र-५ द्वयोः ससन्दर्भं व्याख्यां कुरुत ।** ०८

१. पितृमूलेज्य भाग्यार्कपौष्णाभेषु च यत्कृतम् ।
कुजेन सहितेष्वेषु गृहं दाह्येत चाग्निना ॥

२. द्वारं द्वारस्योपरि यत्तन्न शिवाय सङ्कटं यच्च ।
आव्यात्तं क्षुद्भयदं कुब्जं कुलनाशनं भवति ॥

३. कूपमध्ये गता छाया गृहप्रासादयोर्यदि ।
छायाविद्धं भवेत्तच्च तद्गृहे न हि संवसेत् ॥

**प्र-६ एकस्योपरि निबन्धं लिखत । ०८**

१. सप्तशलाकाविचारः ।

२. द्वारवेधफलम् ।

**प्र-७ द्वयोः टिप्पणी कार्या । ०४**

१. अग्निभययोगः ।

२. यक्षादिभययोगः ।

३. द्वारवेधे विशेषफलम् ।

४. द्वारस्थ कपाटः ।

**प्र-८ पञ्चानामुत्तराणि लिखत । ०५**

१. वेधशब्दार्थः कः ?

२. वेधः कुत्र भवति ?

३. वेधः कुत्र न भवति ?

४. द्वारं कुत्र करणीयम् ?

५. गृहारम्भे शुभमासाः लिखत ।

६. ज्येष्ठमासे गृहारम्भफलं किम् ?

७. राशयः कति ? के च ते ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ द्वयोः ससन्दर्भं व्याख्यां कुरुत । ०८**

१. स्वामीहस्तप्रमाणेन ज्येष्ठपत्नीकरेण वा ।
गर्भमानं भवेद्देहं नृणां प्रोक्तं पुरातनैः ॥

२. अदर्शनेन दीचारे दूरे वा समभूमिष्ठ ।
न वेध्यन्ते गृहाः यथोक्तं दिशि संस्थिताः ॥

३. मृदुध्रुवक्षिप्रभेषु रिक्तामावर्जितेषु च ।
व्यर्कारवारलग्नेषु क्रूरे चाष्टमवर्जिते ॥

**प्र-१० एकस्य उत्तरं लिखत । ०८**

१. गृहारम्भे मासफलविचारः विशदं वर्णयत ।

२. शङ्कुस्थानविधिं विशदं लिखत ।

**प्र-११ एकस्य टिप्पणीं लिखत । ०२**

१. अजिरविचारः ।

२. शङ्कुलक्षणम् ।

**प्र-१२ एकवाक्येन द्वयोः उत्तरं लिखत । ०२**

१. वास्तुपूजने सर्वप्रथमं कस्मै बलिं प्रदेयम् ?

२. सूर्यवेधः कः ?

३. ऊर्ध्वमुखनक्षत्राणि कानि ?

४. अधोमुखनक्षत्राणि कानि ?